X

CHUNILAL GANDHI VIDYABHAVAN
SURAT.

Manuscripts Library

S.D.P.B.
Coll. No. 69

Title TRIPURASUNDARIMAHIMNASTO-
TRA.

CHUNILAL GANDHI VIDYABHAVAN, SURAT

Shastri Dinmanishankar Pustak-Bhandara

No.: 69 Subject: Stotra [illegible]

Title: [illegible]sundari mahimna stotra

Author: Durvasas Scribe: —

Date of the work: — Date of the Ms.: V.S. 1745

Place of the work: — Place of the Ms.: —

Size: 9.2" by 4.2" Extent: 5 foll.

Language: Sanskrit. Script: Devanagari.

Remarks: Complete.

॥ श्रीगणेशाय नमः ॥ श्रीत्रिपुरसौंदर्यै नमः ॥ श्रीमातस्त्रिपुरे परात्परतरे देवि त्रिलोकी महासौंदर्यार्णवमंथनोद्भ
वसुधाप्राचुर्यरत्नोज्वलं ॥ उद्यद्भानुसहस्रनूतनजपापुष्पप्रभं ते वपुः स्वांते मे स्फुरतु त्रिकोणनिलयं ज्योतिर्मयं वा
ङ्मयं ॥१॥ आदिक्षांतसमस्तवर्णसुमणिप्रोते वितानप्रभे ब्रह्मादिप्रतिमाभिकीलितषडाधाराब्जकक्षोन्नते
॥ ब्रह्मांडाब्जमहासने जननि ते मूर्तिं भजे चिन्मयीं सौषुम्नायतनपादपंकजमहामध्ये त्रिकोणस्थितां ॥२॥ वंदे वाग्भवमैं
द्वात्मसदृशं वेदादिविद्यागिरो भाषादेशसमुद्भवाः पशुगताश्छंदांसि सप्तस्वरान् ॥ तालानंच महाध्वनीन्प्रकटयत्यास्त ८
प्रसारेण यत्तद्बीजं पदवाक्यमानजनकं श्रीमातृके ते परं ॥३॥ त्रैलोक्यस्फुटमंत्रतंत्रमहिमस्वात्मोक्तिशक्तिं विना
यद्बीजं व्यवहारजालमखिलं नास्तीति मातस्तव ॥ तज्जाप्यस्मरणप्रसक्तसुमतिः सर्वज्ञतां प्राप्यकः शब्दब्रह्मनिवासभू
तवदनो नेंद्रादिभिः स्पर्द्धते ॥४॥ यामात्रात्र विराजते ति विशदा तामष्टधा मातृकां शक्तिं कुंडलिनीं चतुर्विधतनुं यस्त
त्वचिन्मत्यते ॥ सो विद्याखिलजन्मकर्मदुरितारण्यप्रबोधाग्निना तस्मीकृत्य विकल्पजालमखिलं मातः परे तद्ध्रु
जं त्वा ॥५॥ तत्ते मध्यमबीजमंबकलयाम्याद्रिप्रवर्णक्रियास्थाने छादिमनंतशक्तिमहिमव्यक्तिं व्यनक्ति स्फुटं ॥
उत्पत्तिस्थितिकल्पकल्पिततनुः स्वात्मप्रमाणैर्वियत्कामं यं ब्रह्महरीश्वरादिविबुधैः कामक्रियायोजितैः ॥६॥ कामा
कारणतां गतानगणितान्कार्यैरनंतैर्महीमुख्यैः सर्वगतैश्च विविधैर्मनिरन्नैः स्फुटं ॥ कामक्रोधसुलोभमोह

मनो

मदमात्सर्यादिविध्वंसकं बीजं राजति तत्वणौमित दहं ते साधु कामेश्वरि ॥७॥ यद्भक्त्याखिलकामपूरणमन्वर्पणात्स्वात्म
प्रभावात्महाजाड्यध्वांतविदारणैकतरणिज्योतिः प्रबोधप्रदं ॥ यद्देहेषु चराचरेषु तेष्वतिसुखं मात्रात्रयेणैमिति श्र
विद्येतवसर्वराजवशकृत्तत्कामराजं भजे ॥८॥ यत्ते देवि तृतीयबीजमनलज्वालावलीसन्निभं सर्वाधारतुरी
यबीजपदमस्याप्नास्तीस त्रिधंशस्थितं ॥ ब्रह्मन्यांत विसर्गभूषितमथोंकारात्मकं तत्परात्सच्चिद्रूपमनन्यतुल्य
महिमस्वांतेमम द्योततां ॥९॥ अनुष्ठानानुष्ठाना स्वयमपि महांतोपि लघवः सकीला निष्कीला गुरुभिरुपदिष्टा
अपि नवाः ॥ प्रसन्नायां देवि त्वयि सकलसंवाञ्छफलदास्तरोर्मूले सिक्ते फलति खलु शाखाः शतमपि ॥ सर्वे सर्वत
एव सर्वसमयाः कार्येषु देवि त्वयाप्यंतरात्तत्तद्विश्वरूपीककर्मनिरिदं संव्यक्तभुवानापरा ॥ वागर्थव्यवहारकारण
तनुः शक्तिर्जगद्व्यापिनी यद्बीजात्मकतां गतानवशिवे तन्नौमि बीजं परं ॥११॥ अग्नीषोममणिप्रभंजनधरानी
रांबरस्थायिनी शक्तिर्ब्रह्महरीशवासवमुखामर्त्यासुरात्मस्थिता ॥ दृष्टस्थावरजंगमस्थितमहाचैतन्यरूपात्
यायद्बीजस्मरणेन सेवनवती प्रादुर्भवत्यंबिके ॥१२॥ स्वात्मश्रीविजिताजविष्णुमघवछ्रीपूरणैकव्रतं सद्दि
व्याकविता वितानलहरीकल्लोलिनी दीपकं ॥ बीजं यत्त्रिगुणप्रवृत्तिजनकं ब्रह्मेति यद्योगिनः ॥ शांताः सत्य
मुपासते तदिह ते चिंते द्वयेश्रीपरे ॥१३॥ ऐकैकं तव मातृकेपरतरं संयोगि वा योगि वा विद्यादिप्रकटप्रका

राजनकं जाड्यांधकारापहं ॥ यन्निष्ठाश्च महोत्पलासनमहाविष्णुप्रहर्त्रादयो देवाः स्वेषु विधिषु नंतमहिमस्फूर्तीं
दधत्येव तत् ॥१४॥ इत्थं त्र्यक्षरी एव पि मूलवाग्भवमहाश्रीकामराजं स्फुरच्छक्त्याख्यानि चतुः क्रमनि प्रकटितान्यु
त्कृष्टकूटानि ते ॥ अत्र तुर्यकृति संख्यवर्णविदितान्यु[illegible]मनि ते न्यासकृत्कांते शिवे यो जानाति स एव सर्व
जगतां सृष्टिस्थितित्रिंशत्तत् ॥१५॥ नित्यं यो खिलमातृकाद्यरसखीसौभाग्यविद्यां जपेत् संप्रज्याद्यरचक्र
राजनिलयां सायंतनाग्निप्रभां ॥ कामाख्यं च शिवाख्य तत्वमुत्तयं व्याप्यात्मना सर्वतो दीव्यंती मिहतस्य
सिद्धिरचिरात्स्यात्तत्स्वरूपैकता ॥१६॥ काव्यैः पापठितैः किमाद्यविदुषां जोघुष्यमाणैः पुनः किं तैर्व्याकर
णैर्विनोबुधिषया किं वाभिधानश्रिया ॥ एतैरंब न बोभवीति सुकविस्तावत्तव श्रीमतो यावन्नानुसरीसरीति
सरणिं पादाब्जयोः पावनीं ॥१७॥ गेहं नाकति गर्वितः प्रणमति स्त्रीसंगमो मोक्षति द्वेषी मित्रति पातकं
सुकृतति क्ष्मावल्लभो दासति ॥ मृत्युर्वैद्यति दूषणं गुणति यत्त्वत्पादसंसेवनात् त्वां वंदे भवभीतिभंजनक
रीं गौरीं गिरीशप्रियां ॥१८॥ आद्यैरग्निरवींदुबिंबनिलयैरंब त्रिलिंगात्मभिर्मिश्रारक्तसितप्रभैरनुपमैर्युष्म
त्पदैस्तैस्त्रिभिः ॥ स्वात्मोत्पादितकालतो निगमावस्थामरादित्रयैरुद्भूतं त्रिपुरेति नामकलयेद्यस्ते समस्यन्नो
बुधः ॥१९॥ आद्यो ज्ञाप्यति मार्पवाचकतयारूढः स्वरः पंचमः सर्वोत्कृष्टतमार्थवाचकतया वर्णाः पवर्गां ॥२॥

तिमः ॥ त्वत्कत्वेन महाविभूतिसरणिः स्वाधारगो बिंदुतो ब्रह्ममध्यस्थित इत्यनः प्रणवतां ते गीयते बागमैः ॥२०॥ गा
यत्री सशिरास्तुरीयसहिता संध्यामयी ह्यागमैराख्याता त्रिपुरे त्वमेव महतां शर्मप्रदा कर्मणां ॥ तत्तद्दर्शनमुख्यश
क्तिरपि च त्वं ब्रह्मकर्मेश्वरः कर्ताहं पुरुषो हरिश्च सविता बुद्धः शिवस्त्वं गुरुः ॥२१॥ अंतः प्राणमनः प्रबोध
परमानंदैः शिरःपक्षपुच्छात्मप्रकटैर्महोपनिषदां वाग्भिः प्रसिद्धीकृतैः कोशैः पंचभिरेभिरंब भवती येत
त्प्रलीना मितिज्योतिः प्रज्वलदुज्ज्वलात्मचपलां यो वेद स ब्रह्मवित् ॥२२॥ सच्चित्त्वमसीति वाक्यविदितेरध्या
त्मविद्या शिवे ब्रह्माख्यैरतुलप्रभावसहितैस्तत्त्वैस्त्रिभिः सद्गुरोः ॥ त्वद्रूपस्य मुखारविंदविवरात्संप्राप्य दीक्षा
मतो यस्त्वां विंदति तत्त्वतस्तदहमित्यार्यः स मुक्तो भवेत् ॥२३॥ सिद्धांतैर्बहुभिः प्रमाणगणितैरन्यैरविद्यात
मोनकृत्रैरिव सर्वमंधतमसं तावन्न निर्भिद्यते ॥ यावत्ते सवितेव सन्मतमिदं नोदेति विश्वांतरे यावज्जन्म विमो
चनैकनिपुणं श्रीशांभवी श्रीशिवे ॥२४॥ आत्मासौ सकलेंद्रियाश्रिततनुर्बुध्यादिशीलान्वितः कर्मबद्धतनु
र्जनिं च मरणं प्राप्नोति यत्कारणं ॥ न त्वे देवि महाविलासलहरीदिव्यायुधानां जयस्तस्मात्त्वां गुरुमभ्युपेत्य
कलये त्वामिव चेन्मुच्यते ॥२५॥ नानायोनिसहस्रसंभववशाज्जाता जनन्यः कति प्रख्याता जनकाः कियंत
इति मे सन्त्यंति चाग्रे कति ॥ एतेषां गणनैव नास्ति महतः संसारसिंधो विधे भीतं मां नितरामनन्यशरणं रक्ष

तुकंपानिधे॥२५॥देहद्योतकरैरहंतैर्बद्धविधैर्दिनिश्वहोमैर्जपैःस्वंतानैर्हयमेधमुख्यसुमुखैर्नानाविधैःकर्मभिः
यत्संकल्पविकल्पजालमिलितैःप्राप्यंपदंतस्यतेद्दूरादेवनिवर्त्ततिपरतरंमातःपदंनिर्मलं॥२७॥पंचाशन्निज
देहजाक्षरमयैर्नानाविधैर्धातुभिर्बद्धैर्यैःपदवाक्यमानजनकैरर्थाविनाभाविते॥स्मानित्रायचिदर्थकर्म
फलजानंदैरनंतैरिदंविश्वंव्याप्यचिदात्मनाहमहमित्युज्जृंभसेमाम्बिके॥२८॥श्रीचक्रेश्रुतिमूलकोशइति
तेसंसारचक्रापहंविज्ञानंतदधिष्ठितंतवशिवेज्योतिर्मयंसर्वतः॥एतन्मंत्रमयात्मिकाभिररुणश्रीसुं
दरीभिर्वृतंमध्येबैंदवसिंहपीठललितंत्वंब्रह्मविद्याशिवे॥२९॥आताम्रार्कसहस्रदीप्तिपरमासौंदर्य
सारैरलंलोकातीतमहोदयैरुपचितासर्वोपमागोचरैः॥नानानर्घ्यविभूषणैरगणितैर्जाज्वल्यमानाभि
नस्त्वंमातस्त्रिपुरारिसुंदरिकुरुस्वांतेनिवासंमम॥३०॥सिंजन्नूपुरपादकंकणमहामुद्रासुलाक्षारसा
लंकारांकितमंघ्रिपंकजयुगंश्रीपादुकालंकृतं॥उद्यत्स्वन्नखचंद्रखंडरुचिरंरक्तजपासन्निभंब्रह्मादित्रिद
शासुरार्चितमहंमूर्ध्निस्मराम्यंबते॥३१॥आरक्तच्छविनातिमार्दवयुजानिःश्वाससहार्येणयत्कौशेयेनवि
चित्ररत्नघटितैर्मुक्ताफलैरुज्ज्वलैः॥कूजत्कांचनकिंकिणीभिररजितःसन्नद्धकांचीगुणैरादिम्नंसुनितंबबिं
बमरुणंतेप्रजयाम्यंबिके॥३२॥मुक्ताहारत्नसुवर्णकांतिललितैस्तेबाहुवल्लीरसंकेयूरायुतबाहुदंडवल ॥१३॥

यैर्हस्तांगुलीभूषणैःसंयुक्ताःकलयामिहारमणिभिर्मुक्ताकलापीकृतग्रीवापट्टविभूषणेनसुभगेकंठंचकं
बुश्रियं॥३३॥उद्यत्पूर्णकलानिधिप्रतिवदनंवक्त्रप्रसन्नंसदासंफुल्लांबुजपत्रकांतिसुषमाधिक्कारदक्षेक्ष
णं॥सानंदंस्मितमंदहासमसकृत्स्त्राडुनवित्कौतुकंकुंदाकारसुदंतपंक्तिशशिभापूर्णंस्मराम्यंबते॥३४॥
कस्तूरीघनसारकुंकुमरजोगंधोत्कटैश्चंदनैरालिप्तंमणिमालयातिरुचिरंग्रैवेयहारादिभिः॥दीप्तंदिव्य
विभूषणैर्जननितेज्योतिर्विभास्वत्कुचव्याजस्वर्णघटद्वयंहरिहरब्रह्मादिपीतंभजे॥३५॥तप्तस्वर्ण
कृतोरुकुंडलयुगंमाणिक्यमुक्तोल्लसद्धीराबद्धमनन्यतुल्यमपरंहैमंचचक्रद्वयं॥शुक्राकारनिकार
दक्षममलंमुक्ताफलंसुंदरंबिभ्रत्कर्णयुगंभजामिललितंनासाग्रभागेशिवे॥३६॥जातीचंपककुंदकेस
रमहागंधोद्भिरत्केतकीनीपाशोकशिरीषमुख्यकुसुमप्रोत्तंसिताधूपिता॥आनीलांजनतुल्यमत्तम
धुपश्रेणीववेणीतवश्रीमातःश्रयतांमदीयहृदयांभोजंसरोजालये॥३७॥लेखाभिन्नविचित्ररत्नघटितं
हैमंकिरीटोत्तमंमुक्ताकांचनकिंकिणीगणमहाहीरप्रवालोज्ज्वलं॥चंचच्चंद्रकलाकलापकलितंदेवद्रु
पुष्पार्चितंमाल्यैरब्बविलंबितंसुशिखरंबिभ्रच्छिरस्तेभजे॥३८॥उद्दीप्तंचसुवर्णदंडकलितंपूर्णेंदुबिंबीकृतं
छत्रंमौक्तिकचित्ररत्नघटितंक्षौमांशुकोत्तंसितं॥मुक्ताजालविलंबितंसकलशंनानाप्रसूनार्चितंबंजे

डामरचामराणि दधते श्रीदेवि ते सुश्रिया ॥३९॥ विद्यामंत्ररहस्यवित्मुनिगणैः स्तोत्रोपचारार्चनं वेदादिस्तु
तिगीयमानचरितां वेदांतवाच्यात्मिकां ॥ सर्वस्त्वारवलुतूर्यतामुपगता त्वद्रश्मि देव्या परात्वां नित्ये समुपा
सते स्वविभवैश्चीचक्रनाथे शिवे ॥४०॥ श्रृंगारादिरसालयं त्रिभुवनैर्माल्यैरतुल्यैर्युतं सर्वांगीणसदंगराग
सुरभिश्रीमद्वपुर्धूपितं । ताम्बूलारुणपल्लवाधरयुतं स्मेरं त्रिपुंड्रं दधड्डालं नंदनचंदनेन जननि ध्यायामि
ते मंगलं ॥४१॥ एवं यः स्मरति प्रबुद्धसुमतिः श्रीमत्स्वरूपं परं हृद्धोप्याशुयुवा च वत्यनुपमस्त्रीणामनंगाय
ते ॥ सोष्टैश्वर्यतिरस्कृताखिलमहीभ्राजं जितात्मालयः पृथ्वीपालकिरीटकोटिवलिभिः पुष्पार्चितांघ्रि
र्भवेत् ॥४२॥ अपतवधनुपुंड्रेक्षु त्वत्प्रसादमयि चुतिस्त्रिभुवनवधूमोहज्योत्स्नाकलानिधिमंडलं ॥ सक
लजननिस्मारं स्मारंगतः स्मरतां नरस्त्रिभुवनवधूमोहांभोधौ प्रपूर्णविधुर्भवेत् ॥४३॥ प्रसूनशरपंच
कं प्रकटज्जंभनागुंफितं त्रिलोकमवलोकयत्यमलचेतसा वंचलं ॥ अशेषरमणीजनस्मरविजृंभणं सः स
दापदुर्भवति ते शिवे त्रिजगदंगनाक्षोभणे ॥४४॥ पाशांकुशपूरितमहासुमाणि प्रकाशं यो वा तव त्रिपुरसुंदरि
सुंदरीणां ॥ आकर्षणेखिलवशीकरणे प्रवीणं चित्ते दधाति सजगत्त्रयवश्यकृत्स्यात् ॥४५॥ यः स्वांतेकलय
ति कोविदस्त्रिलोकस्तंभारंभणवणमत्युदारवीर्यं ॥ मातस्ते विजयि महांकुशं स पाशादेवाः स्तंभयति च न ॥५॥

स्तु तु जोन्यसैन्यं ॥४६॥ चापध्यानवशाद्भवोद्भवमहामोहं महज्जंभनं । प्राप्यातं प्रसवेषु चिंतनवशात्तत्तच्छरव्यं कु
धीः ॥ पाशध्यानवशात्समस्तजगतां मृत्योर्वशत्वं महादुर्गं स्तं भमहांकुशस्य मननान्मायाममेयां ते ॥४७॥ न्यासं
त्वागणेशग्रहनगणमहायोगिनीराशीपीठैः पंचाशद्भिश्चवर्णैस्सहितवडकैरष्टवाग्देवताभिः ॥ स श्रीकंठा
दियुग्मैर्निजविमलतनौ केशवाद्यैश्च तत्त्वैः षड्भिः शक्तिर्धरित्र्याद्यैर्भगवति भवती यः स्मरेत्स त्वमेव ॥४८॥ भगवति
तव पादपद्मानि सत्यानि कस्त्रिजगति परिहृत्य प्रज्ञाय निद्रायसूज्रादिषु ॥ अजिरतकलनादसंगीतरंगानि
रंगा स्तेतपरिमलमिह किं तु विंदेमि कंदे पि संदोहितः ॥४९॥ सुरपतिपुरलक्ष्मीजृंभणातीतलक्ष्मीं प्रसरसि
निजगेहे यस्य देवि त्वमार्ये । विविधवकुकलानां पाचनं तस्य तस्य त्रिभुवनविदितात्साजंभनेतेस्फुरंति रिष्टा ॥
॥५०॥ मातस्त्वां तु चः स्वमंदहरिति सदनेयं नरिंद्रः चुस्रयैराज्ञा भुक्त्वार्कसूनेंदुत्रिरपि निगमब्रह्म निःघोष
शक्तिः ॥ प्राणापानादिमुक्तौ कलयसि विमलं मानसं ध्यानयोगं येषामार्ये स पश्यति भवति सुरक्तानां ब्रह्मतेजा
नते च ॥५१॥ क्रमेवुद्धिर्वाचां परम विदुषो मंदसरणिः घ्नते मालब्रह्मप्रमुखविबुधस्वांतववसां ॥ अप्रतन्मे वि
स्फूर्तिः परतरमहिम्नस्तव नुतिप्रसिद्धं कुंतव्यं बकुकलनचापल्यमपि ते ॥५२॥ प्रसीद परदेवते मम हृदि प्र
तं भयं विदारय दरिद्रतां दलय देहि सर्वज्ञतां । विधेहि करुणानिधे चरणपद्मयुग्मं स्वकं विदारितजरामृति
त्रिपुरसुंदरी श्रीशिवे ॥५३॥ संगीतांगिरिजे विचित्रक नामानमायवा क्वस्मरतिं व्याख्यानं द्रुदितावकीयचरण

द्वंद्वंचसर्वस्त्रितौ॥अर्हांकर्मणिशांभवेतिविपुलांभ्रीजंजणांमंदिरैसौंदर्यवपुषिप्रकाशमतुलंप्राप्नोतिविद्याप
रः॥५४॥इतित्रिपुरसुंदरीस्तुतिमिमांपठेद्यःसुधीःसस्सर्वदुरितादवीपदवंदावानलः॥भवेन्मनसिवांछितं
प्रथितरुद्धिसिद्धिर्नवेदनेकविधिसंपदांपदमनन्यतुल्योभवेत्॥५५॥पृथ्वीपालप्रकटमुकुटस्रग्रजोरंजितां
घ्रिर्विद्वत्स्तुतिनतिसमाराधितोबाधितारिः॥विद्याःसर्वाःकलयतिद्दाख्याकरोतिप्रवादालोकाश्चर्यैर्नवनवनये
रिंदुबिंदुप्रकाशैः॥५६॥त्वष्पंवैड्यस्तुद्यद्दिनकरकिरणाकारमाकारतेजःसुज्ञानेन्दूरिनागंनिजगुरुकुलनंदुर्गमंयोगमा
र्गे॥आयष्यप्रपोष्यंहरगिरिविशदंकीर्त्तिमन्येत्यन्नमौदेहांतेब्रह्मपारंपरशिवचरणाकारमन्येतिविद्वान्॥५७॥दु
र्वाससाविदितदिव्यमुनीश्वरेणविद्याकलायुवतिमन्मथपत्त्रिनिनेनत्॥स्तोत्रंविधायरुचिरंत्रिपुरांबिकायावेदागमो
रूपदवीविदितैकतत्त्वैः॥५८॥याकाचित्त्रचतिःपुरागुणमयीपापायामहामोहिनीकामक्रोधसुलोभमोहमदमात्स
र्यादिजननीबीजंजगन्मन्यते॥तस्यामग्रमियंनिबद्धहृदयंयामोचयत्यंबिकावंदेदंनवसाववंधनिचयक्लेशायता
नीश्वरीं॥५९॥यत्रैरमनोमदीयंतत्रैर नवस्वरूपेयत्रैववरशिरोमदीयंतत्रैवतत्रैवपदद्वयंते॥६०॥सदसदनु
ग्रहनिग्रहगृहीतमुनिविग्रहोभगवान्॥सर्वासामुपनिषदांदुर्वासाजयतिदेशिकःप्रथमः॥६१॥इतिदुर्वासा
कृतंत्रिपुरसुंदरीमहिम्नस्तवःसंपूर्णः॥ ॥ ॥ ॥ ॥संवत्१७५४वर्षेभाद्रपदवदि१४दिनेलिखितमि
दं॥ ॥ ॥ ॥ ॥ ॥ ॥ ५